# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (३)

१९.०७.२०१०

# पुनरावर्तनम्

- सूत्रप्रभेदाः,
- माहेश्वरसूत्राणि,
- इत्संज्ञा – हलन्त्यम्,
- प्रत्याहाराः – आदिरन्त्येन सहेता,
- अन्योन्याश्रयः

# १. हलन्त्यम् (१.३.३)

- एकपदात्मकं सूत्रम् ।
- हलि अन्त्यं हलन्त्यम् ।
- 'हल्' इति सूत्रेऽन्त्यमित्स्यात् ।

# २. आदिरन्त्येन सहेता (१.१.७१)

- चत्वारि पदानि । आदिः, अन्त्येन, सह, इता ।
  - अन्त्येन इता सहितः आदिः मध्यगानां स्वस्य च संज्ञा स्यात् ।
  - इति हल्-संज्ञायाम् ।
  - आदिः – यस्मात् पूर्वं नास्ति, परमस्ति ।
  - अन्त्यम् – यस्मात्परं नास्ति, पूर्वमस्ति ।
  - 'स्वं रूपं शब्दस्याशब्द संज्ञा' (१.१.६८) इति सूत्रात् 'स्वम्' इति अनुवर्तते ।

# हलन्त्यम् (१.३.३)

- पदद्वयम् । हल्, अन्त्यम् ।
- उपदेशेऽन्त्यं हल् इत् स्यात् ।

- सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ।
- 'हलन्त्यम्' (१.३.३) इति सूत्रे 'उपदेशेऽजनुनासिक इत्' (१.३.२) इति सूत्रात् 'उपदेशे' इति, 'इत्' इति च अनुवर्तते ।

- उपदेशः आद्योच्चारणम् ।
- धातु-प्रातिपदिक-निपात-प्रत्याहार-सूत्र-प्रत्यय-आदेश-आगमानामन्त्यम् इति भाष्यम्
- ततः अण्, अच् इत्यादिसंज्ञासिद्धौ ।